शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

अभिज्ञान शाकुन्तलम् नाम नाटकस्य श्लोक व्याख्या।

"नीवाराः शुककोटरार्भकमुख भ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः॥"

प्रस्तुतोऽयं श्लोकः शास्त्री प्रथमखण्डस्य(?) संस्कृतगीता कविकुल दिवाकरेण, संस्कृत साहित्योदधि पूरस्य अमृतजलदायिनेन महाकविना कालिदासेन विरचितस्य अभिज्ञानशाकुन्तलम् नाम नाटकस्य प्रथमाङ्कात् उद्धृतोऽस्ति। श्लोकेऽस्मिन् मृगानुसरण रतो दुष्यन्तः महर्षेः कण्वस्य आश्रमसमीपमागत्य वैखानसेन मृगानुसरणात् निवारितः, समाहितश्च आतिथ्यसत्कार ग्रहणाय आश्रमे प्रविशन् राजा तपोवनस्य लाभत एव अयम् अमोघः तपोवनस्येति ध्रुवं कथयित्वा आश्रम चिह्नानि वर्णयति -

तत्प्राक् अन्वयः शुककोटरार्भक मुखभ्रष्टाः नीवाराः, क्वचित् इङ्गुदीफलभिदः प्रस्निग्धाः उपलाः एव सूच्यन्ते, विश्वासो-पगमात् अभिन्नगतयः मृगाः शब्दं सहन्ते, तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः सन्ति।

तरूणां = वृक्षाणां अधः = नीचैः शुकाः = पक्षीविशेषाः तेषां ये कोटरार्भकाः = कोटरस्थाः शिशवः तेषां मुखेभ्यः = आननेभ्यः भ्रष्टाः = निपतिताः नीवाराः धान्यविशेषाः सन्ति, क्वचित् = कस्मिंश्चित् स्थाने इङ्गुदी = तापसतरुः तेषां फलानि भिन्दन्ति = विदारयन्ति तैलानि: तारणाय कुर्वन्ति इति, अतएव प्रस्निग्धाः = चिक्कणाः उपलाः = प्रस्तराः एव सूच्यन्ते = प्रकाश्यन्ते। अत्रास्मान् कोऽपि कश्चित् न = नहि विश्वासोपगमात् = विश्वासलाभात् अभिन्न-गतयः = परिवर्तिताः गतयः = गमनानि येषां ते अभिन्न-गतयः = एकेन रूपेण गमनशीलाः मृगाः = हरिणकाः शब्द-ध्वनिं सहन्ते = आकर्णयन्ति, उद्विग्ना नैव भवन्ति। तोयाधाराः = जलाशयाः तेषाम् पथाः = मार्गाः जलाशय-पन्थानश्च वल्कलानां = तरुत्वचा मुनिवस्त्राणां शिखाः अग्रभागाः तेभ्यः निष्यन्दामिः = निःसृतानि रेखानि:= जल रेखाभिः आङ्किताः = चिह्निताः सन्ति। एतन्या-कथितेऽपि ज्ञायते एवायमाश्रमस्तपोवनस्येति।

अत्र तपोवनस्याभोगे नीवारादीनां हेतुत्वात् काव्यलिङ्गम् — "हेतोर्वाक्य पदार्थते काव्यलिङ्गं निगद्यते" इति लक्षणात्। किञ्चाश्रमाभोगे नीवा-रादीनां हेतुत्वात् अनुमानालङ्कारः। आश्रमस्य स्वभाव वर्णनात् स्वभावोक्तिश्चेति काव्यलिङ्गानुमान-स्वभावोक्त्यादीनां सङ्करः। शार्दूलविक्रीडितं वृत्तम् - "सूर्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणात्।

उपेन्द्र झा
21.12.20
सहायक प्रो० साहित्य
रा० उ० सं० महाविद्यालय
कुण्डेली, पुनिन्द्रौ

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

## अलङ्कार विवेचनम्

### सा० द० दर्पण दशम् परिच्छेद:

संसृष्टिरलङ्कारयो: विवेचनम् ।

'मिथोऽनपेक्षयैतेषां स्थिति: संसृष्टिरुच्यते ।' पूर्वेऽस्मिन् कक्षायां वर्णितानाम् अनुप्रासोपमादीनाम् अलङ्काराणां परस्परं नैरपेक्ष्येण अवस्थानं संसृष्टिरलङ्कार: । परस्परं पार्थक्येन तिल तण्डुल न्यायेन जायमानानाम् अलङ्काराणाम् एकस्मिन् पद्ये वाक्ये वा एकदेशस्थेन सदा ~~संसृष्टि~~ संसृष्टि नाम अलङ्कार इत्यर्थ: ।

उदाहरणं यथा-

'देव: पायादपायान्न: स्मेरेन्दीवरलोचन: ।
संसारध्वान्तविध्वंसहंस: कंसनिषूदन: ॥'

अत्र पायादपायादिति यमकम् 'ध्वान्त विध्वंस' इत्यत्र ध्वयोरनेकधा सकृत् साम्यात् छेकानुप्रास:, एवं ध्वंस हंस कंस इत्यत्र अन्त्यानुप्रास:, 'संसार' इत्यादौ वृत्त्यनुप्रासश्च, इत्येतेषां शब्दालङ्काराणां मिथोऽनपेक्षत्वेन अवस्थानात् संसृष्टि: । द्वितीय पादे एकागता लुप्तोपमा, द्वितीयार्धे च श्रीकृष्णे सूर्यत्वारोपस्य संसारे ध्वान्तारोपकारणमिति अश्लिष्टशब्दनिबन्धनं केवलं परम्परितरूपकम् । उभयो: यमकानुप्रासयो: उपमारूपकयोश्च शब्दार्थालङ्कारयो: मिथोऽनपेक्षया अवस्थानात् शब्दार्थालङ्कार संसृष्टि: ।

उपेन्द्र झा
2/11/20
स्नातको० प्रा० साहित्य
रा० उ० सं० महावि०
पुरखेना, हरियाणा

Dec 2

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)

वेणीसंहारनाम नाटकस्य श्लोक व्याख्या।

"तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥"

श्लोकोऽयं - सप्तम शताब्द्याः उत्तरार्द्धे अष्टम् शताब्द्याः पूर्वार्द्धे च कान्यकुब्ज देशे समुत्पन्नः, योग संग्रह, बौद्ध दर्शन, छन्दशास्त्र अलङ्कार विषयेषु निष्णातेन वीर रस प्रतिपादने लब्ध प्रतिष्ठितेन महाकविना भट्टनारायणेन विरचित वेणी संहार नाम नाटकस्य प्रथमाङ्कात् उद्धृतोऽस्ति। श्लोकेऽस्मिन् सहदेवः ~~कुरु~~ क्रुद्धं भीमसेनमवलोक्य कथयति यद्भवतः विविध विरोधिव्यवहारं विलोक्य श्रुत्वा वा ज्येष्ठ भ्राता (युधिष्ठिरः) अप्रसन्नो न भवेत्, तदा भीमसेनः कथयति यद् - गुरुः नृपसभायां तथाविधां काञ्चिद् दृष्ट्वा, चिरं व्याधैः सह वने उषितं दृष्ट्वापि मयि खिद्यते, कुरुषु तु अद्यापि खेदं न वहति।

गुरुः नृपसदसि तथाभूतां पाञ्चालतनयां दृष्ट्वा, वने वल्कलधरैः व्याधैः सार्धं सुचिरं उषितं (दृष्ट्वा), विराटस्य आवासे अनुचितारम्भनिभृतं स्थितं (दृष्ट्वा) मयि खिन्ने अद्यापि खेदं भजति न कुरुषु।

तथेति - गुरुः = ज्येष्ठो भ्राता युधिष्ठिरः, नृपसदसि = राजसभायाम्, तथाभूतां = तादृशीं, दुःशासनेन केशैर्गृहीतां कर्षिताम्, पाञ्चालतनयां - पाञ्चालराजस्य विराट नृपतेः, तनयां = दुहितरं द्रौपदीम्, दृष्ट्वा = अवलोक्य वने = विपिने वल्कलधरैः = चीरधारिभिः (अस्माभिः) व्याधैः = आखेटकैः सार्धं सुचिरं = चिरकालम्, उषितं = निवसितं दृष्ट्वा विराटस्य = विराट्नृपतेः आवासे = निवासस्थाने अनुचितारम्भनिभृतं = अननुरूपकार्येण, एकान्ततम्। स्थितं = अवस्थितं दृष्ट्वा = अवलोक्य मयि = भीमसेने खिन्ने = दुःखिते अद्यापि = अधुनापि खेदं भजति = दुःखं प्राप्नोति, कुरुषु = कौरवेषु अद्यापि खेदं न करोति - यैः वयं ईदृशं दशां प्रापिताः इत्याशयः। अत्र शिखरिणी वृत्तम् - तल्लक्षणम् -

"रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी"

इति

उपेन्द्र झा
21/12/20
सहा० प्रा० साहित्य
रा० उ० सं० महावि०
पुरकैना, शङ्खियाँ